P.V.G.'s

# Muktangan English School & Jr. College,

44, Vidyanagari, Parvati, Pune - 411009.

## Terminal Examination (2025-26)

## Standard - X

Subject : Sanskrit (Composite) Marks : 40

Date : 14 | 10 | 2025 Time : 8.00 am to 10.00 am

**सूचना :**

**१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।**
**२) यथासूचनम् आकलनकृतय: व्याकरणकृतय: आरेखितव्या: ।**
**३) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम् ।**

**प्रथम : विभाग : – सुगमसंस्कृतम् (६)**

**प्र.१ (अ) चित्रं दृष्ट्वा नामानि लिखत । (४ त:३)** **(3)**

१) 

२) 

३) 


४) 

**(आ) सङ्ख्या अक्षरै: अङ्कै: वा लिखत । (३ त: २)** **(2)**

१) पञ्चनवति: –   २) ३३ –   ३) २८ –

**(इ) स्तम्भमेलनं कुरूत ।** **(1)**

| | अ | ब |
|---|---|---|
| १) | पञ्चवादनम् | ८.४५ |
| २) | पादोननववादमम् | ९.४५ |
| | | ५.०० |

## द्वितीय : विभाग : – गदयम् (१४)

**प्र.२ (अ) गद्यांश पठित्वा निर्दिष्टा: कृती: कुरुत । (४ त:३)**

अस्ति एकं चम्पकं नाम अरण्यम् । अरण्ये चित्राङ्गो नाम मृग: एकाक्षो नाम काकश्च स्नेहेन निवसत: स्म। एकदा चित्राङ्ग: वने भ्रमन् केनापि शृगालेन अवलोकित: । क्षुद्रबुद्धि: नाम स: शृगाल: स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत् । अस्तङ्गते सवितरि क्षुद्रबुद्धि: मृगेण सह मृगस्य निवासस्थानं गत: । मृगशृगालौ दृष्ट्वा काकोऽवदत्, ''सखे चित्राङ्ग! कोऽयं द्वितीय: ?'' मृग: अब्रूत, ''जम्बूकोऽयम् । अस्मत्सख्यम् इच्छति ।'' काक: उपादिशत्, ''अकस्मादागन्तुना सह मित्रता न युक्ता ।'' तदाकर्ण्य जम्बूक: सकोपम् आह, ''मृगस्य प्रथमदर्शने भवानपि अपरिचित: एव आसीत् । यथायं मृग: मम बन्धु: तथा भवानपि ।'' मृग: अब्रवीत्, ''अलं विवादेन । वयं सर्वे आनन्देन एकत्र निवसाम: ।'' काकेनोक्तम्, ''एवमस्तु ।''

**(१) अवबोधनम् । (३ त: २)** **(2)**

क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

अस्ति एकं ---------- नाम अरण्यम् । (स्तबकं / चम्पकं)

ख) क: कं वदति? ''अलं विवादेन ।''

ग) पूर्णवाक्येन उत्तरं लिखत । अरण्ये कौ निवसत:स्म?

**(२) शब्दज्ञानम् (३ त: २)** **(2)**

च) गद्यांशत् केऽपि तृतीयान्तपदे लिखत ।

छ) सन्धिविग्रहं कुरुत – काकोऽवदत् – काक: + --------- ।

एकाक्षो नाम – -------- + नाम ।

ज) लकारं लिखत । काक: : उपविशत् ।

**(आ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत ?**

तदा पृथुभूपेन तदर्थं धनु: सज्जीकृतम्। तदा भूमि: स्त्रीरूपं धृत्वा तस्य पुरत: प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दु:शासक: वेनराज: राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्ष: नृप: । यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि । अत: धनु: त्यज । खनित्राणि, हलान्, कुद्दालकानि, लवित्राणि च हस्ते गृहीत्वा प्रजाजनै: सह कृषिकार्यं कुरु ।।''

**(१) अवबोधनम् (३ त: २)** **(2)**

क) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत ।

त्वं तु पजाहितदक्ष: सेवक: ।

ख) एष: गद्यांश: कस्मात् पाठात् उद्धृत: ?

ग) पूर्णवाक्येन उत्तरं लिखत ।

स्त्री-रूपं धृत्वा पृथुनृपस्य पुरत: का प्रकटिता अभवत् ?

**(२) जालरेखाचित्रं पूरयत ।** (2)




**(इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ त: १)** **(4)**

१) (तत: प्रविशति वैखानस:, अन्यौ तापसौ च)

वैखानस: - (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्य:, न हन्तव्य: । आशु प्रतिसंहर सायकम् । राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्त: - प्रतिसंहृत एष: सायक: । (यथोक्तं करोति)

**अथवा**

२) कर्ण: - किं नेच्छति भवान्? अपर्याप्तं कनकं दास्यामि ।

शक्र: - गृहीत्वा गच्छामि । नेच्छामि कर्ण, नेच्छामि ।

कर्ण: - तेन हि जित्वा पृथ्वीं ददामि ।

शक्र: - पृथिव्या किं करिष्मामि । नेच्छामि कर्ण, नेच्छामि ।

कर्ण: - अथवा मच्छिरो ददामि ।

**ई) माध्यमभाषया उत्तरं लिखत । (२ त: १)** **(2)**

१) 'तण्डुलान् आनय' इति पिता अर्णवं किमर्थम् आदिष्टवान् ?

२) काकेन क: उपाय: उक्त:?

**तृतीय : विभाग : – पदयम् (१०)**

प्र ३ **अ) पद्यांशान् पठित्वा निर्दिष्टाः कृतीः कुरुत ।** **(4)**

१) निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु

लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।

अद्यैव वा मरणमस्तु युगान्तरे वा

न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।।

२) यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदन तापताडनैः ।

तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा ।।

३) उत्तमो नातिवक्ता स्यादधमो बहु भाषते ।

सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते ।

क) पूर्णवाक्येन उत्तरत ।

कः बहु भाषते ।

ख) सन्धिविग्रहं कुरुत ।

स्यादधमः = ---------- + --------- ।

ग) मञ्जूषातः उचितं शब्द चित्वा तालिकां पूरयत ।

| | | | |
|---|---|---|---|
| नीतिनिपुणाः | ________ | ________ | वा |
| ________ | समाविशतु | ________ | वा |

(निन्दन्तु, गच्छतु, युगान्तरे, मरणम्, स्तुवन्तु, लक्ष्मी)

घ) समानार्थक शब्दं लिखत । लक्ष्मीः -

**आ) श्लोक पूर्तिं कुरुत । (३ तः २)** **(4)**

१) घटं भिन्द्यात् ......... ।।

२) यादृशं वपते ........... ।।

३) आत्मनो मुखदोषेण ....... ।।

**इ) माध्यमभाषया सरलार्थलेखनं कुरुत । (२ तः १)** **(2)**

१) शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।

उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।

२) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।

वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ।।

**चतुर्थः विभागः – भाषाभ्यासः (१०)**

**प्र ४ अ) पृथक्करणम् ।**

**१) नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४)** **(2)**

| नाम | सर्वनाम |
|---|---|
| | |

(कर्णः, युष्मद्, मृगः, भवान्, एतस्याः)

**२) क्रियापदानि – धातुसाधितविशेषणानि च पृथक्कुरुत । (५ तः ४)** **(2)**

| क्रियापदम् | धातुसाधितविशेषणम् |
|---|---|
| | |

(पठितः, वदन्तु, गतवान्, स्मरसि, उक्तवती)

**आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २)** **(4)**

क) सङ्ख्या / क्रमा आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत । (३ तः २)

१) भवने मम गृहं ---------- तले वर्तते । (सप्ते । सप्तमे)

२) --------- वेदा वर्तन्ते । (चत्वारि / चत्वारः)

३) अहं एक पाठं -------- सम्यक् पठामि (द्विवारं / द्वौ)

ख) समासविग्रहानां समासनामाभिः सह मेलनं कुरुत ।

| अ | ब |
|---|---|
| जलदः | कर्मधारय |
| अल्पम् | बहुव्रीहि समास |
| भारतदेशः | उपपद तत्पुरुषः |
| क्षुद्रा बुद्धियस्य सः | नञ्-तत्पुरुषः |

ग) समानार्थक शब्दान् / विरुद्धार्थक शब्दान् लिखत । (४ तः २)

नदी, निन्दन्तु, रासभः, कुसुमम्

घ) योग्यं पर्यायं चिनुत । (उ तः २)

१) फलितं मे --------- । (प्रयोजनम् / मनोरथम्)

२) एतद् विश्वं --------- । (अणुभिः / तण्डुलैः)

३) त्वं द्रष्टुं ----------- । (शक्नोषि / शक्नोति)

**प्र. ४ इ)विशिष्ट विभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (४ तः २)** **(2)**

१) दा - यच्छ    २) रुच् - रोच् -    ३) कृते    ४) अलम्

❖❖❖